# Shivaproktam Bilvavaibhavavarnanam

# શિવપ્રોક્તં બિલ્વવૈભવવર્ણનમ્

## Document Information

Text title : Shivaproktam Bilvavaibhavavarnanam

File name : shivaproktaMbilvavaibhavavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 13 | 11.2-55||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં બિલ્વવૈભવવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

- શિવપાર્વતીસંવાદે -

શિવઃ (ઉવાચ)

મમ નેત્રસમુદ્ભૂતો માર્તાણ્ડશ્ચણ્ડવિક્રમઃ ॥ ૧૧.૨॥

સર્વેષાં તેજસો રાશિરીશાનાત્મક એવ સઃ ।
ચતુર્દશલોકોત્થતમોનાશાય કલ્પિતઃ ॥ ૧૨॥

ચન્દ્રોઽપ્યોષધિરાટ્ ક્લૃપ્તો મમ સવ્યોરુનેત્રકઃ ।
અતિભાલતલોદ્ભૂતનયનો લોકદાહકૃત્ ॥ ૧૩॥

ન તુ પાપવિનાશાય કલ્પિતઃ કશ્ચનામરઃ ।
તદર્થં ચિન્તયિત્વાહમસૃક્ષં બિલ્વમેવ હિ ॥ ૧૪॥

મમ પ્રિયકરો નિત્યં તરુરાજોઽયમીશ્વરિ ।
યથા ત્વયિ સદા પ્રીતિર્બિલ્વેઽપ્યસ્મિન્સદા મમ ॥ ૧૫॥

મદ્રૂપો વૃક્ષરાજોઽયં વૃક્ષાણાં પતિરસ્મ્યહમ્ ।
રુદ્રગીતોઽહમીશાનિ પાપભેદાય સૃષ્ટવાન્ ॥ ૧૬॥

બહુ ચ બ્રાહ્મણેનોક્તો જ્યોતિર્બિલ્વેતિ પાર્વતિ ।
યતો મદક્ષિસમ્ભૂત આદિત્યઃ સમજાયત ॥ ૧૭॥

બિલ્વો મમાક્ષસમ્ભૂત ઉભયોર્જનકસ્ત્વહમ્ ।
સોમસ્યાપ્યસ્મિ જનકઃ સર્વેષાં શ્રુતિચોદિતઃ ॥ ૧૮॥

બ્રહ્મણો જનકશ્ચાહં વિષ્ણોરિન્દ્રસ્ય પાર્વતિ ।
મત્તો યતોઽભવદ્બિલ્વ આદિત્યોઽપિ મહેશ્વરિ ॥ ૧૯॥

વેદેઽપિ યજુષોભાગે પ્રોક્ત આદિત્યસોદરઃ ।
તમોનાશાય સૃષ્ટોઽયમાદિત્યસ્તપતાં વરઃ ॥ ૨૦॥

પાપનાશાય સૃષ્ટોઽયં બિલ્વો ભૂતલમાશ્રિતઃ ।
પાપાનાં પાપિનાં વાપિ દર્શનાર્ચનતઃ સ્વયમ્ ॥ ૨૧॥

પાપં હરતિ વૃક્ષોઽસૌ દર્શનસ્પર્શનાર્ચનૈઃ ।
ત્રિદળં બિલ્વપત્રં ચ ત્રિગુણાત્મકમેવ હિ ॥ ૨૨॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ વૃક્ષ(બિલ્વ)પત્રત્રયે સ્થિતાઃ ।
તસ્માદયં વૃક્ષરાજો મત્પ્રિયઃ પાપનાશકઃ ॥ ૨૩॥

સર્વેષાં સર્વપાપાનિ નાશયત્યેવ કૃત્સ્નશઃ ।
યથા તમોગુણં કૃત્સ્નં નાશયેદ્દિવિ સંસ્થિતઃ ॥ ૨૪॥

તથા ભૂમિગતો બિલ્વઃ પાપનાશાય શઙ્કરિ ।
લોકાનાં પાપનાશાર્થં સમાનીતો મયામ્બિકે ॥ ૨૫॥

કૈલાસમૌલિતો બિલ્વપત્રેણાર્ચન્તુ માં જનાઃ ।
ઇત્યેવં કૃપયા પાપાન્ દૃષ્ટ્વા નરકદુઃખિતાન્ ॥ ૨૬॥

અસઙ્ખ્યાન્માનવાંશ્ચાપિ મુનીનપિ મહેશ્વરિ ।
લોકપાલાનુતાપેન સમાનીતો ભુવં પ્રતિ ॥ ૨૭॥

અર્ચન્તિ માં સુકૃતિનો બિલ્વપત્રૈસ્ત્રિશાખકૈઃ ।
કોમલૈર્વા પરિમ્લાનૈઃ શુષ્કૈઃ પર્યુષિતૈરપિ ॥ ૨૮॥

તેન મુક્તિં પ્રયાન્ત્યેતે બિલ્વૈર્લિઙ્ગાર્ચનેન મે ।
બિલ્વપત્રાર્ચનાભાવે મમ પૂજૈવ નિષ્ફલા ॥ ૨૯॥

સર્વોપચારક્લૃપ્તાપિ બિલ્વપત્રવિવર્જિતા ।
તસ્માદ્બિલ્વાર્ચનેનૈવ સર્વેષાં મુક્તિદોહ્યહમ્ ॥ ૩૦॥

ધન્યઃ પૂજયતે બિલ્વૈર્ધન્યો મામભિવીક્ષ્યતે ।
નાધન્યઃ કીર્તયેન્માં હિ પૂજને તસ્ય કા કથા ॥ ૩૧॥

યો બિલ્વપત્રં સઙ્ગૃહ્ય રક્ષતિ પ્રીતમાનસઃ ।
મત્પૂજાર્થં મહાદેવિ શુષ્કં પર્યુષિતં તુ વા ॥ ૩૨॥

ત્રિપત્રમેકપત્રં વા પાતયેલ્લિઙ્ગમસ્તકે ।
તેન સ્વવંશગૈઃ સર્વૈર્મદગ્રે ક્રીડતે ગણઃ ॥ ૩૩॥

એકેનાપિ ચ બિલ્વેન સકૃત્સમ્પૂજયેદ્ધિ મામ્ ।
સ મુક્તો મોચયેદન્યાનિતિ વિદ્ધિ મહેશ્વરિ ॥ ૩૪॥

સર્વપુણ્યાત્પ્રિયતરં પત્રૈર્વા પરમેશ્વરિ ।
બિલ્વપત્રૈઃ સદા દેવિ યથા પ્રિયતરો ગુહઃ ॥ ૩૫॥

તથા બિલ્વાર્ચનેનૈવ સર્વેષાં મુદિતોઽસ્મ્યહમ્ ।
કૃતાનન્તમહાપાપોઽપ્યનાયાસેન મુચ્યતે ॥ ૩૬॥

બિલ્વપત્રૈશ્ચ સમ્પૂજ્ય મલ્લિઙ્ગમભિવીક્ષ્યતે ।
પ્રાતઃ સઙ્ગવમધ્યાહ્ને સાયાહ્નેઽપિ પ્રદોષકે ॥ ૩૭॥

સોમવારે ચતુર્દશ્યાં પર્વસ્વપિ વિશેષતઃ ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય સર્વસિદ્ધિં લભેન્નરઃ ॥ ૩૮॥

મમ પ્રિયતરો ભૂયાદ્બ્રહ્મતત્વં ચ વિન્દતિ ।
સુવૃત્તો વાપિ દુર્વૃત્તો બિલ્વૈરભ્યર્ચ્ય માં શિવે ॥ ૩૯॥

સ સર્વપૂજ્યો ભવતિ સ તપસ્વી મુનિઃ સ્વયમ્ ।
સર્વતીર્થેષુ સુસ્નાતઃ સર્વયજ્ઞેષુ દીક્ષિતઃ ॥ ૪૦॥

સ ચ સર્વમહાનન્દકૃત્તમો હૃત્તમો મમ ।
યો બિલ્વપત્રશતકૈઃ સહસ્રૈરપિ લક્ષકૈઃ ॥ ૪૧॥

કોટિભિર્બિલ્વપત્રાણાં સમર્ચનકરો ભવેત્ ।
સ એવ ધન્યો માન્યો મે ગણેન્દ્રો રજતાચલે ॥ ૪૨॥

યો બિલ્વં પોષયેદ્ભક્ત્યા જલદાનાદિભિઃ શિવે ।
સ ચ વંશયુતો દેવિ ભવેત્સર્વગણાગ્રણીઃ ॥ ૪૩॥

બિલ્વપત્રૈર્બિલ્વમૂલે લિઙ્ગમભ્યર્ચિતં મમ ।
તેન ત્રૈલોક્યલિઙ્ગાનિ પૂજિતાનિ ન સંશયઃ ॥ ૪૪॥

બિલ્વવનકર્તા બિલ્વવન્દનતત્પરાઃ ।
બિલ્વલિઙ્ગેન સંસક્તા બિલ્વદર્શનતત્પરાઃ ॥ ૪૫॥

પ્રાતરુત્થાય યો બિલ્વં પ્રયાતિ પ્રીતિપૂર્વકમ્ ।
સ કૃતાનલ્પપાપોઽપિ મુચ્યતે તેઽપિ મુક્તિગાઃ ॥ ૪૬॥

ભસ્મ ધૃત્વૈવ બિલ્વાનાં સર્વમેવ સમાચરેત્ ।
બિલ્વયુક્તં વનં ધન્યં તત્સઙ્ગાદ્વૃક્ષજાતયઃ ॥ ૪૭॥

વલ્લીગુલ્માદયઃ સર્વે મમ લોકે વસન્ત્યપિ ।

સ્થાવરત્વં પરિત્યજ્ય ભવન્તિ ગણપોત્તમાઃ ॥ ૪૮॥

બિલ્વસ્યૈવાનુષઙ્ગેણ શામ્ભવસ્યાઙ્ગસઙ્ગવત્ ।
બિલ્વપત્રાર્ચનકરૌ ધન્યૌ કણ્ટકનુન્નકૌ ॥ ૪૯॥

શઙ્ખચક્રાદિ ચિહ્નૈસ્તે ભવન્તિ પૃથિવી ભુજઃ ।
બિલ્વમૂલે પ્રજપ્તો યો મન્ત્રઃ કોટિગિણો ભવેત્ ॥ ૫૦॥

શામ્ભવં ભોજયેદ્દેવિ બિલ્વમૂલે વિશેષતઃ ।
સ દરિદ્રોઽપિ સમ્પન્નો ભવત્યેવ ન સંશયઃ ॥ ૫૧॥

પાદૌ પ્રક્ષાલ્ય નત્વાથ ભસ્મધારણપૂર્વકમ્ ।
મન્ત્રમેનં સમુચ્ચાર્ય બિલ્વવૃક્ષં સમારુહેત્ ॥ ૫૨॥

નમસ્તે બિલ્વવૃક્ષાય નવારુણદલાય ચ ।
પત્રં તે શિવપૂજાર્થં ગૃહ્ણામ્યદ્ય ક્ષમસ્વ મે ॥ ૫૩॥

ઇતિ પ્રાર્થ્ય મહાવૃક્ષં ગૃહ્ણીયાત્પત્રમેવ હિ ।
ઉત્તરાગ્રેણ પત્રેણ પૂજનીયોઽહમેવ હિ ॥ ૫૪॥

કિં પુનર્બહુનોક્તેન બિલ્વપત્રં મમ પ્રિયમ્ ॥ ૫૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં બિલ્વવૈભવવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૧૩ । ૧૧.૨-૫૫॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 13 . 11.2-55..

Notes:
Śiva શિવ describes to Pārvatī પાર્વતી about the origin of Bilvataru બિલ્વતરુ and merits of worshiping Him with Bilvapatra બિલ્વપત્ર especially at the Bilvamūla બિલ્વમૂલ and taking care of Bilvavṛkṣa બિલ્વવૃક્ષ. He mentions about the worship especially during Somavāra સોમવાર and Caturdaśī ચતુર્દશી.

Proofread by Ruma Dewan

*Shivaproktam Bilvavaibhavavarnanam*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*